**5.स्वतन्त्रतादिवसे ध्वजारोहणकार्यक्रमः परिसरनिदेशकानामुद्बोधनञ्च-** भारतस्य स्वतन्त्रतायै नैके देशभक्ताः वीराश्च स्वप्राणानां बलिदानं कृतवन्तः, यस्मिन् परिवेशे वयं वसामः तन्निर्मातुं तथाभूतानां परिश्रमो वर्तते येषां स्मरणमात्रेण वयमात्मानं धन्यं मन्यामहे। सम्पूर्णराष्ट्रे स्वतन्त्रतादिवसोपरि तेषां पावनं जीवनमस्माभिः सश्रद्धं स्मर्यते समर्च्यते च। राष्ट्रस्य गौरवभूते दिनेऽस्मिन् सर्वासु शैक्षणिकशैक्षणिकेतरसंस्थासु राष्ट्रीयध्वजारोहणं भवति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेऽपि भारतस्य 73तमः स्वतन्त्रतादिवसोऽयमत्यन्तहर्षोल्लासेन परिपालितः। परिसरनिदेशकमहोदयेन सह सर्वे प्राध्यापकाः शिक्षणेतरकर्मचारिणः छात्रश्च परिसरप्राङ्गणे एकत्रिताः समभवन्। डा.गौतमचौधरिमहोदयस्य संयोजकत्वे प्रो.एम.चन्द्रशेखरमहोदयेन ध्वजोत्तलनं कृतम्। राष्ट्रगानेन सह ध्वजाय नतमस्तकाः सर्वे सञ्जाता आसन्। अनेके छात्राः प्राध्यापकाश्चास्मिन् अवसरे राष्ट्रभक्तिपूर्वकं स्वविचारान् प्रस्तुतवन्तः।